# विचित्ररूपोनुग्रहाः

**Que 1: अधः प्रदत्तेषु भवतः इष्टतमः श्लोकः कः इति सकारणं लिखत।**

**क)  समानशीलापि तदीयवल्लभा**
**तथैव नो चित्तजयं समेयुषी।**
**कदाचिद्रूचे बत वृत्तिलब्धये**
**रमापतिः किं न सखा निषेव्यते।।**

**ख)  इतीरितोƒयं प्रियया क्षुधार्तया**
**जुगुप्समानेƒपि धने मदावहो।**
**तदा त्वदालोकनकौतुकाद्ययौ**
**वहन् पटान्ते पृथुकानुपायनम्।।**

**ग)  प्रपूजितं तं प्रियया च वीजितं**
**करे गृहीत्वाƒकथयः पुरा कृतम्।**
**यदिन्धनार्थं गुरुदारचोदितै-**
**रपर्तुवर्षं तदमर्षिः कानने।।** ***Marks :(6)***

**Ans:** मूल्यनिर्णयसूचकानि

इष्टतमश्लोकचयनाय

सकारणलेखनाय

भाषाशुद्धेः

**Que 2: अधः प्रदत्तं सूचनामाधारीकृत्य स्तोत्रकाव्यान्यधिकृत्य लघुटिप्पणीं लिखत।** ***Marks :(6)***

**सूचनाः**

**स्तोत्रकाव्यलक्षणम्। स्तोत्रकाव्यानां विभजनम्। केरलीयसंस्कृतस्तोत्रकाव्यानि।**

**Ans:** मूल्यनिर्णयसूचकानि

सूचनामनुसृत्य लेखनाय 5 अङ्काः

भाषाशुद्धेः

**Que 3: अधः प्रदत्तां खण्डिकं पठित्वा प्रादेशिकभाषायाम् अनुवदत।**

**नारायणीयभट्टपादाः केरलीयः संस्कृकविः प्रथितः वैयाकरणः चासीत्। सः मलप्पुरं जिल्लायां मेल्पुत्तूर् नामके गृहे जनिमलभत। सः गुरुपवनपुरेशस्य पुरतः विष्णोः चरितं निर्वर्ण्य लिखितं काव्यं भवति**

**श्रीमन्नारायणीयम्। तत्र सप्ताशीति दशके वर्तमानं भवति कुचेलोपाख्यानम्।** ***Marks :(5)***

**Ans:** मूल्यनिर्णयसूचकम्

उचितभाषानुवादस्य कृते पूर्णाङ्कः।

**Que 4: अधः प्रदत्तां सूचनामधिकृत्य कुचेलोपाख्यानस्य एकाम् आस्वादनटीकां लिखत।**

**सूचनाः**

**नारायणीयस्य सप्ताशीतिदशके कुचेलोपाख्यानम् वर्तते।**

**स्वस्य दारिद्र्यस्य शमनार्थं कुचेलः कृष्णस्य समीपं गतवान्।**

**भगवतः अनुग्रहः विचित्ररूपः भवति।**

**रत्नशालासु वसन्नपि कुचेलः भगवत् भक्त्याः मोक्षं ययौ।** ***Marks :(8)***

**Ans:** मूल्यनिर्णयसूचकानि

आस्वादनटीकायाः स्वरूपस्य कृते

सूचनामनुसृत्य लेखनाय

भाषाशुद्धेः

**Que 5: अधः प्रदत्तं श्लोकं पठित्वा सूचनानुसारम् आस्वादनटीकां लिखत।**

**प्रपूजितं तं प्रियया च वीजितं**
**करे गृहीत्वाऽकथया पुराकृतम्।**
**यदिन्धनार्थं गुरुदारचोदितै-**
**रपर्तुवर्षं तदमर्षि कानने।।**

**सूचनाः- आमुखम्, आशयः, आस्वादनम्।** ***Marks :(6)***

**Ans:** मूल्यनिर्णयसूचकानि

सूचनानुसारं लेखनाय

भाषाशुद्धेः

**Que 6: अधः प्रदत्तानि पदानि अर्थेन सह योजयत।** ***Marks :(3)***

| | | |
|---|---|---|
| **गृहाश्रमी** | **-** | **कष्टम्** |
| **बत** | **-** | **गृहस्थः** |
| **जुगुप्समानः** | **-** | **गर्ह्यमानः** |

**Ans:** मूल्यनिर्णयसूचकानि

गृहाश्रमी - गृहस्थः

बत - कष्टम्

जुगुप्समानः - गर्हयमानः

**Que 7: अधःप्रदत्तपदानां समानार्थकपदानि मञ्जूषतः चित्वा योजयत।** ***Marks :(5)***

**प्रशमी - उक्तः**

**ईरितः - पीडाः**

**पृथुकः - दूरीकरोति**

**गदान् - चिपिटकः**

**हरति - जितेन्द्रियः**

**Ans:** मूल्यनिर्णयसूचकानि

प्रशमी - जितेन्द्रियः।

ईरितः – उक्तः।

पृथुकः – चिपिटकः।

हरति – दूरीकरोति।

**Que 8: अधःप्रदत्तं श्लोकांशं पठित्वा रेखाङ्कितपदानां स्थाने समानार्थकपदानि पेटिकातः चित्वा लिखत।**

**समानशीलापि तदीय<u>वल्लभा</u> तथैव नो <u>चित्तजयं</u> समेयुषि।** ***Marks :(2)***

| | | |
|---|---|---|
| **मनोजयं** | **क्रीडाजयं** | **भार्या** |

**Ans:** मूल्यनिर्णयसूचके

भार्या, मनोजयम्।

**Que 9: अधःप्रदत्तम् उदाहरणानुसारं पदच्छेदं लिखत।**

**उदा- न +एव - नैव**

**.... +.... - तथैव**

**उदा- विचित्ररूपः+ तव - विचित्ररूपस्तव।**

**........+ ........ - मनस्त्वम्।**

**उदा- किल+ उपेत्य - किलोपेत्य।**

**.....+ ...... - मूर्धोदति।** ***Marks :(3)***

**Ans:** मूल्यनिर्णयसूचकानि

तथा+ एव। मनः+ त्वम्। मूर्ध +उदति।

**Que 10: अधःप्रदत्तं श्लोकं पठित्वा अन्वयं लिखति।**

**समानशीलापि तदीयवल्लभा**

**तथैव नो चित्तजयं समेयुषी।**

**कदाचिद्वचे बत वृत्तिलब्धये**

**रमापतिः किं न सखा निषेव्यते।।** ***Marks :(4)***

**Ans:** मूल्यनिर्णयसूचिकम्

उचितोत्तरलेखनाय पूर्णाङ्कः।

**Que 11: अधःप्रदत्तं रूपरेखां पठित्वा मेल्पुत्तूर् नारायणभट्टपादस्य जीवनचरितमधिकृत्य टिप्पणिं लिखत।** ***Marks :(6)***

| |
|---|
| **नाम- नारायणभट्टपादः।** |
| **सङ्केतः - मेल्पुत्तूर्, पोन्नानि, मलप्पुरम्।** |
| **गुरवः- माधवाचार्यः, अच्युतपिषारटिः, मातृगुप्तः च।** |
| **कृतयः- नारायणीयं, प्रक्रियासर्वस्वम्, श्रीपादसप्ततिः।** |
| **जीवनकालम्- क्रिस्तोः परं षोडशे शतके।** |

**Ans:** मूल्यनिर्णयसूचकानि

रूपरेखामनुसृत्य लेखनाय

पूर्णतया लेखनाय

भाषाशुद्ध्यर्थं

**Que 12: कोष्ठकात् समुचितमुत्तरं चित्वा लिखत।**

**क. नारायणीयस्य कर्ता कः?**

**(नारायणभट्टतिरिः, व्यासः, भासः)**

**ख. नारायणीयस्य कथा कस्मात् ग्रन्थात् स्वीकृता।**

**(भागवतात्, रामायणात्, महाभारतात्)**

**ग. कुचेलस्य वल्लभा कीदृशी आसीत्।**

**(समानशीला, दुःखिता, सन्तोषवती)**

**घ. कुचेलेन उपानीतम् उपायनं किमासीत्?**

**(पूजद्रव्यं, पृथुकं, पुष्पाणि)**

**ङ. कृष्णकुचेलयोः इन्धनानयनसमये किमभवत्?**

**(अपर्तुवर्षम्, सूर्यस्यातितापमभवत्, प्रचण्डवातं वाति)**

**च. का कृष्णस्य करं रुरोध?**

**(राधा, रमा, सीता)**

**छ. भगवदनुग्रहः कीदृशः अभवत्?**

**(विचित्ररूपः, स्नेहरूपः, दीनरूपः)**

**ज. कुचेलोपाख्यानं नारायणीयस्य कस्मिन् दशके विद्यते?**

**(प्रथमदशके, सप्ताशीतदशके, नवतिदशके)**

**झ. सान्दीपनिमहर्षिः कः आसीत्?**

**(कृष्णस्य गुरुः, कृष्णस्य मन्त्री, कृष्णस्य सेनापतिः)** ***Marks :(6)***

**Ans:** मूल्यनिर्णयसूचकानि

क) नारायणभट्टतिरिः, ख) भागवतात्, ग) समानशीला, घ) पृथुकं, ङ) अपर्तुवर्षम्

च) रमा, छ) विचित्ररूपः , ज) सप्ताशीतदशके , झ) कृष्णस्य गुरुः।

**Que 13: अधः प्रदत्तं श्लोकं पठित्वा आस्वादनटीकां लिखत।**

**कुचेलनामा भवतः सतीर्थ्यतां**
**गतः स सान्दीपनिमन्दिरे द्विजः।**
**त्वदेकरागेण धनादिनिस्पृहो**
**दिनानि निन्ये प्रशमी गृहाश्रमी।।**

**1. कुचेलः कस्य सतीर्थ्यः भवति?**

**2. श्लोके 'विप्रः' इत्यर्थकं पदं किम्?**

**3. श्लोकस्यास्य आशयं स्ववाक्यैः लिखत।** ***Marks :(4)***

**Ans:** मूल्यनिर्णयसूचकम्

1 कृष्णस्य ।

2 द्विजः ।

उचितोत्तरलेखनाय

**Que 14: अधःप्रदत्तं पद्यं पठित्वा गद्यक्रमं पूरयत।**

**कुचेलनामा भवतः सतीर्थ्यतां**

**गतः स सान्दीपनिमन्दिरे द्विजः।**

**त्वदेकरागेण धनादिनिःस्पृहो**

**दिनानि निन्ये प्रशमी गृहाश्रमी।।**

**गद्यक्रमः**

**सान्दीपनिमन्दिरे ........ सतीर्थ्यतां गतः प्रशमी ........... कुचेलनामा स द्विजः ......... धनादिनि स्पृहः ............ निन्ये।** ***Marks :(4)***

**Ans:** मूल्यनिर्णयसूचकम् ।

भवतः,गृहाश्रमी, त्वदेकरागेण ,दिनानि , इति क्रमात् लेखनाय पूर्णाङ्कः।

**Que 15: अधःप्रदत्तां सूचनामनुसृत्य मेलपुत्तूरनारायणभट्टपादस्य जीवनचरितं खण्डिकारूपेण संक्षिप्य लिखत।**

**सूचनाः-**

- **मेल्पुत्तूर् गृहे जनिमलभत।**
- **जीवनकालं क्रिस्तोः परं षोडशशतके।**
- **माधवाचार्यः दामोदरः अच्युतपिषारटिः इत्येते गुरवः।**
- **विविधशास्त्रेषु निष्णातः।**
- **नारायणीयम्, धातुकाव्यम्, श्रीपादसप्ततिः च प्रमुखाः कृतयः।** ***Marks :(6)***

**Ans:** मूल्यनिर्णयसूचिके

आशयपूर्णतयै लेखनायै

सूचनानुसारं लेखनायै

भाषाशुद्धये